॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥
२. द्वितीयः सर्गः
विज्ञानभानुमति कालबलेन लीने
दुर्भाष्यसंतमससंततितो जनेऽंधे ।
मार्गात् सतां स्खलति खिन्न हृदो मुकुंदं
देवाश्चतुर्मुखमुखाः शरणं प्रजग्मुः ॥ २.१ ॥
नाथः कलौ त्रियुगहूतिरनुद्बुभूषुः
ब्रह्माणमप्यनवतारमनादिदिक्षुः ।
सर्वज्ञमन्यमनवेक्ष्य स कार्यवीर्यं
स्मेराननो भुवनजीवनमाबभाषे ॥ २.२ ॥
वेदांतमार्गपरिमार्गणदीनदूनाः
दैवीः प्रजा विशरणाः करुणापदं नः ।
आनंदयेः सुमुख भूषितभूमिभागो
रूपांतरेण मम सद्गुणनिर्णयेन ॥ २.३ ॥
आदेशमौलिमणिमुज्ज्वलवर्णमेनं
बद्धांजलिर्मरुदनर्घमधत्त मूर्ध्ना ॥
हारावळीमिव हृदा विबुधेंद्रयाज्ञां
बिभ्रन्निजाननुजिघृक्षुरवातितीर्षत् ॥ २.४ ॥
कालः स ऐव समवर्तत नाम यावत्
चिंताकुलं विविधसाधुकुलं बभूव ।
वेदांतसंततकृतांतरसं न विद्मः
श्रेयो लभेमहि कथं नु वयं बतेति ॥ २.५ ॥
तत्प्रीतये रजतपीठपुराधिवासी देवो
विवेश पुरुषं शुभसूचनाय ।
प्राप्ते महाय महिताय महाजनौघे
कोलाहलेन सकुतूहलिनि प्रवृत्ते ॥ २.६ ॥
आविष्टवानकुशलं पुरुषं प्रकृत्या
प्रत्याययन्निह जनान् नितरामनृत्यत् ।
उत्तुंगकेतुशिखरे स कृतांगहारो

रंगांतरे नट इवाखिलविस्मयात्मा ॥ २.७ ॥
आभाष्य सोऽत्र जनतां शपथानुविद्धं
उच्चैरिदं वचनमुद्धृतदोर्बभाषे ।
उत्पत्स्यते जगति विश्वजनीनवृत्तिः
विश्वज्ञ एव भगवानचिरादिहेति ॥ २.८ ॥

सद्वीपवारिनिधिसप्तकभूतधात्र्या
मध्येऽपि कर्मभुवि भारत नाम खंडे ।
काले कलौ सुविमलान्वयलब्धजन्मा
सन्मध्यगेहकुलमौलिमणिर्द्विजोऽभूत् ॥ २.९ ॥
वेदाद्रिसद्रजयपीठपुरेश्वराभ्यां
ग्रामो विभूषिततरः शिवरूप्यनामा ।
हेमाद्रिराजविभुराजदिळावृताभः तस्या–
भवद् गुरुगुणः खलु मूलभूमिः ॥ २.१० ॥
रामाधिवेशितहरिस्वसृमौलिमाला–
राजद्विमानगिरिशोभितमध्युवास ।
क्षेत्रं स पाजकपदं त्रि कुलैककेतुः
कं यद् दधाति सततं खलु विश्वपाजात् ॥ २.११ ॥
अर्थं कमप्यनवमं पुरुषार्थ हेतुं
पुंसां प्रदातुमुचितामुचितस्वरूपाम् ।
कन्यां सुवर्णलसितामिव वेदविद्यां
जग्राह विप्रवृषभ प्रतिपादितां सः ॥ २.१२ ॥
रेमेऽच्छयोपनिषदेव महाविवेको
भक्त्येव शुद्धकरणः परमश्रिताऽलम् ।
मिथ्याभिमानरहितः परयेव मुक्त्या
स्वानंदसंततिकृता स तया द्विजेंद्रः ॥ २.१३ ॥
तस्य प्रभोश्चरणयोः कुलदेवतायाः
भक्तिं बबंध निजधर्मरतः स धीरः ।
विज्ञातभारतपुराणमहारहस्यं
यं भट्ट इत्यभिवदंति जना विनीतम् ॥ २.१४ ॥
गोविंदसुंदरकथासुधया स नृणां

आनंदयन्न किल केवलमिंद्रियाणि ।
किंतु प्रभो रजतपीठपुरे पदाब्जं
श्रीवल्लभस्य भजतामपि दैवतानाम् ॥ २.१५ ॥
इत्थं हरेर्गुणकथासुधया सुतृप्तो
नैर्गुण्यवादिषु जनेष्वपि साग्रहेषु ।
तत्वे स कालचलधीरतिसंशयालुः धीमान्
धिया श्रवणशोधितया प्रदध्यौ ॥ २.१६ ॥

त्राता य ऐव नरकात् स हि पुत्रनाम
मुख्यावनं न सुलभं पुरुषादपूर्णात् ।
तस्मात् समस्तविदपत्यमवद्यहीनं
विद्याकराकृति लभेमहि कैरुपायैः ॥ २.१७ ॥
पूर्वेऽपि कर्दमपराशरपांडुमुख्याः
यत्सेवया गुणगणाढ्यमपत्यमापुः ।
तं पूर्णषड्गुणतनुं करुणामृताब्धिं
नारायणं कुलपतिं शरणं व्रजेम ॥ २.१८ ॥
इत्थं विचिंत्य स विचिंत्यमनन्य बंधुः
प्रेष्ठप्रदं रजतपीठपुराधिवासम् ।
भक्त्या भवाब्धिभयभंगदया शुभात्मा
भेजे भुजंगशयनं द्विषडब्दकालम् ॥ २.१९ ॥
पत्न्या समं भगवतः स भजन् पदाब्जं
भोगान् लघूनपि पुनर्लघयांचकार ।
दांतं स्वयं च हृदयं दमयांचकार
स्वच्छं च देहमधिकं विमलीचकार ॥ २.२० ॥
तीव्रैः पयोव्रतमुखैर्विविध व्रताग्र्यैः
जायापती गुणगणार्णवपुत्रकामौ ।
संपूर्णपूरुषमतोषयतां नितांतं
देवैरिताविव पुराऽदितिकश्यपौ तौ ॥ २.२१ ॥
नाथस्य भूरिकरुणासुधयाऽभिषिक्तौ
श्रीश्रीधरप्रततिशारशरीरयष्टी ।

भूरिव्रतप्रभवदिव्यसुकांतिमंतौ
तौ देहशुद्धिमतिमात्रमथालभेताम् ॥ २.२२ ॥
कांतादृतौ समुचितेऽथ बभार गर्भं
सा भूसुरेंद्रदुहिता जगतां हिताय ।
अच्छांबरेव रजनी परिपूरिताशा
भाविन्यपास्ततमसं विधुमाद्यपक्षात् ॥ २.२३ ॥
तं पूर्वपक्षसितबिंबमिव प्रवृद्धं
यावद् द्विजेंद्रवनिता सुषुवेऽत्र तावत् ।
अंशेन वायुरवतीर्य स रूप्यपीठे
विष्णुं प्रणम्य भवनं प्रययौ तदीयम् ॥ २.२४ ॥

संपूर्णलक्षणचणं नवराजमान
द्वारांतरं परमसुंदरमंदिरं तत् ।
राजेव सत्पुरवरं भुवनाधिराजो
निष्कासयन् परमसौ भगवान् विवेश ॥ २.२५ ॥
संतुष्यतां सकलसन्निकरैरसद्भिः
खिद्येत वायुरयमाविरभूत् पृथिव्याम् ।
आख्यानितीव सुरदुंदुभिमंद्रनादः
प्राश्रावि कौतुकवशैरिह मानुषैश्च ॥ २.२६ ॥
नाथं निषेव्य भवनानतिदूरमाप्तः
प्राज्ञो महप्रकृतदुंदुभिनादपूर्वात् ।
पुत्रोद्भवश्रवणतो महदाप्य सौख्यं
ज्ञानं परोक्षपदमप्यमतेष्टहेतुम् ॥ २.२७ ॥
आविश्य वेष्म निजनंदनमिंदुवक्त्रं
भूयोऽभिनंद्य स मुकुंददयां प्रवंद्य ।
जातस्य तस्य गुणजातवहस्य जात–
कर्मादिकर्मनिवहं विदधे सुकर्मा ॥ २.२८ ॥
ज्ञानार्थमेव यदभूदसुदेव ऐषः
यद् वासुदेवपदभक्तिरतः सदाऽसौ ।
तद् वासुदेवपदमन्ववदन् सुरेंद्राः

तातेन यन्निगदितं सुतनामकर्त्रा ॥ २.२९ ॥
पातुं पयांसि शिशवे किल गोप्रदोऽस्मै
पूर्वालयः स्वसुतसूनुतया प्रजातः ।
निर्वाणहेतुमलभिष्ट परात्मविद्यां
दानं ध्रुवं फलति पात्रगुणानुकूल्यात् ॥ २.३० ॥
अत्रस्तमेव सततं परिफुल्लचक्षुः
कांत्या विडंबितनवेंदु जगत्यनर्घम् ।
तत् पुत्ररत्नमुपगृह्य कदाचिदाप्तः
स्वस्वामिने बुध उपायनमार्पयत् सः ॥ २.३१ ॥
नत्वा हरिं रजतपीठपुरालयं
तं बालस्य संपदमनापदमर्थयित्वा ।
साकं सुतेन परिवारजनान्वितोऽसौ
प्रायान्निशीथसमये निजमेव धाम ॥ २.३२ ॥

दोषेयुषां सममनेन वनेऽतिभीमे
तत्क्रीडितग्रह इहैकतमं तुतोद ।
उद्भ्रांतरक्तमवलोक्य तमभ्यधायि
केनाप्यहो न शिशुतुत् कथमेष इत्थम् ॥ २.३३ ॥
आविश्य पूरुषमुवाच महाग्रहोऽसौ
अस्मद्विहारसमयोपगतान् समस्तान् ।
यच्छक्तिगुप्तिरहितानलमस्मि हंतुं
लोकेश्वरः स बत बालतमः किलेति ॥ २.३४ ॥
स्तन्येन बालमनुतोष्य मुहुः स्वधाम्नो
माता कदाचन ययौ विरहासहाऽपि ।
विश्वस्य विश्वपरिपालकपालनाय
कन्यां निजामनुगुणां किल भीरुरेषा ॥ २.३५ ॥
सा बालकं प्ररुदितं परिसांत्वयंती
मुग्धाक्षरेण वचसाऽनुनिनाय मुग्धा ।
मा तात तात सुमुखेति पुनः प्ररोदीः
माता तनोति रुचितं त्वरितं तवेति ॥ २.३६ ॥

रोदे क्रियासमभिहारत एव वृत्ते
पोतस्य मातरि चिरादपि नाऽगतायाम् ।
जग्राह बालमथ चैक्षत मातृमार्गं
साऽपि क्रियासमभिहारत एव बाला ॥ २.३७ ॥
कर्तव्यमौढ्यमभिपद्य निरूप्य सा तं
प्राभोजयत् खलु कुलस्थकुलं प्रपक्वं ।
शीतं पयोऽपि सततं परिपाययंती
यस्योष्णरोगमतिवेलमशंकतांबा ॥ २.३८ ॥
नूनं पिपासुरतिरोदिति हंत बालो
धिङ् मां दयाविरहितां परकृत्यसक्ताम् ।
इत्याकुला गृहमुपेत्य तदा प्रसन्नं
पूर्णोदरं सुतमवैक्षत विप्रपत्नी ॥ २.३९ ॥
पृष्ट्वाऽवगम्य सकलं च ततः प्रवृत्तं
यूनां च दुस्सहमिदं शिशुनोपभुक्तम् ।
इत्थं विचिंत्य तनयां बहु भत्सयंत्या
भीतं तयोत कुपितं मनसाऽनुतप्तम् ॥ २.४० ॥

आरोग्यशालिनि तदाऽपि पुरेव पुत्रे
विस्मेरतामुपजगाम जनन्यमुष्य ।
यस्य त्रिलोकजननी जननी विषेऽपि
पीते न विस्मयमवाप समस्तशक्तेः ॥ २.४१ ॥
स्तन्यं मुहुः किल ददौ जननी गृहीत्वा
क्षेमाय तं किल दधज्जनको जजाप ।
अन्यो जनोऽपि किल लाळयति स्म किंतु
सर्वोऽपि तन्मुखसुहासरसायनोत्कः ॥ २.४२ ॥
देवादिसद्भिरनुपालितयाऽऽदरेण
देव्याऽऽत्मनेव विलसत्पदया नितांतम् ।
अव्यक्तया प्रथमतो वदनेऽस्य वाण्या
शालीनयेव भुवनार्चितया विजह्रे ॥ २.४३ ॥
प्राग्रिंखणं स्वयमथ स्थितिमेष

चक्रे पश्चाद् गतिं परिचयेन किल क्रमेण ।
विश्वस्य चेष्टितमहो यदनुग्रहेण
सर्वं तदस्य पवनस्य विडंबनं हि ॥ २.४४ ॥
पुच्छांतमच्छमवलंब्य कदाचिदेष
प्रातर्व्रजाद् व्रजत ऐव निजर्षभस्य ।
प्रायात् प्रियस्य सहसा स्वजनैरदृष्टो
नानावनेषु चरतश्चरतस्तृणानि ॥ २.४५ ॥
उत्तुंगशृंगलसितस्य महिष्ठमूर्तेः
पादावृतावनितळस्य सुरंध्रकस्य ।
आश्रित्य तस्य शुशुभेऽवयवैकदेशं
बालो दिवाकर इवोदयपर्वतस्य ॥ २.४६ ॥
लीलां करोति नु गृहांतरगो नु बालः
कूपांतरे नु पतितः प्रकृतिस्वतंत्रः ।
इत्थं विचिंत्य स मुहुः स्वजनो विमृग्य
हंतानवेक्ष्य तनयं हृदि तापमाप ॥ २.४७ ॥
बालस्य बालपरिलंबनगोचरं तद्
व्यश्वस्यतापि वचनं वनगोचरोक्तम् ।
यत् सायमैक्षत जनः शिशुमाव्रजंतम्
ऐकाब्दकं वृषभबालकृतावलंबम् ॥ २.४८ ॥

चिंतामणींद्रमिव चिंतितदं दरिद्रो
विज्ञानमार्गमिव विष्णुपरं मुमुक्षुः ।
नष्टं च नंदनमिति स्वजनोऽस्य लब्ध्वा
नाथस्य तस्य तमनुग्रहमेव मेने ॥ २.४९ ॥
लीलावसानसमये सहसा कदाचिद्
आर्योऽमुनाऽभ्यवहृतिं प्रति चोद्यमानः ।
रोद्धैष नोऽस्ति धनिको वृषविक्रयीति
प्रोवाच नंदनमुखेंदुमवेक्ष्य मंदम् ॥ २.५० ॥
लीलाकरेण स करेण सुकोमलेन
बीजांतराणि किल कानिचिदाशु तस्मै ।

स्मित्वाऽर्भकोऽभिमतनिष्कपदे यदाऽदा–
दादत्त तानि धनिको बहुमानपूर्वम् ॥ २.५१ ॥
लब्धं सुतादिति वदन् द्विजपुंगवेन
कालांतरे निजधने प्रतिदित्सितेऽपि ।
साक्षादमानवनवाकृतितः स लेभे
बीजच्छलेन पुरुषार्थमहो विशिष्टम् ॥ २.५२ ॥
वासुदेवमिह वाऽसुदेवता सत्कलामभिननंद तं जनः ।
वासुदेवमिति वासुदेवसन्नामकं विविधलीलमर्भकम् ॥ २.५३ ॥
इति विहरति मह्यां विष्णुदासेऽपि गूढे
समजनि सुजनानां चित्तमानंदपूर्णम् ।
उदयति घनमालालीनभानौ च भानौ
ननु जननयनाब्जैर्लभ्यतेऽलं विकासः ॥ २.५४ ॥
॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
नारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते द्वितीयः सर्गः ॥